International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 233-236
© 2026 IJMH
www.themultijournal.com

Received: 09-02-2026
Accepted: 25-02-2026
Publish : 27-02-2026

**Dr. Anjali Kabat**
Asst. Professor (Guest Faculty),
Dept. of Sanskrit,
Rajendra University, Prajna Vihar,
Balangir, Odisha

**Correspondence:**
**Dr. Anjali Kabat**
Asst. Professor (Guest Faculty),
Dept. of Sanskrit,
Rajendra University, Prajna Vihar,
Balangir, Odisha

# अभिनवगुप्तानुसारं शान्तरसस्य स्वरूपम्

**Dr. Anjali Kabat**

**DOI:** https://doi.org/10.5281/zenodo.20393955

**रसशब्दस्य सृष्टिः –**

रसः इति पदं वेदादानीतम्। सोमरसस्यार्थे **"दधान कलशे रसम्"**[1] इति वर्तते।तत्रापि "रसो वै सः"**"रसं ह्येवायं लब्ध्वाऽऽनन्दी भवतीति"**[2] वर्तते।

**"आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते आनन्देन जातानि जीवन्ति आनन्दं प्रयन्त्यभिसंविशन्ति ।"**[3]

तत्र नाट्यशास्त्रे रसस्वरूपं प्रतिपादयन्नाह भरतमुनिः –"रस इति कः पदार्थः ? उच्यते- आस्वाद्यमानत्वात्। कथमास्वाद्यते रसः ? यथाहि नानाव्यञ्जन-संस्कृतमन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषाः हर्षादींश्चाधिगच्छन्ति, तथा नानाभावाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावान् आस्वादयन्ति सुमनसः प्रेक्षका हर्षादींश्चाधिगच्छन्ति" इति।

पुनश्च भरतेन उक्तं यत्-

**"न हि रसाद् ऋते कश्चिदर्थः प्रवर्तते"**[4] इति।

तत्रैव रसनिष्पत्तिसूत्रं यथा –

**"विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः"**[5] इति।

रससूत्रमाश्रित्य विविधा वादाः प्रादुरभवन्। परन्तु तद् विषये अत्र न विचारणीयम् । आचार्याः अभिनवगुप्तपादाः नाट्यशास्त्रग्रन्थस्य अभिनवभारतीटीकायां रसविषये अकथयन् यत् –

**यथा बीजाद्भवेद्वृक्षो वृक्षात्पुष्पंफलं यथा।**
**तथा मूलं रसाः सर्वे तेभ्यो भावा व्यवस्थिताः।।"**[6] इति ।

**रससंख्या –**

आलंकारिकाः रससंख्याविषये स्वाभिमतं स्व स्व ग्रन्थे प्रकटयन्ति । भरतो रसानाम् संख्यां अष्टौ इति नाट्यशास्त्रे वदति । यथा-

**"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।**
**बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः ।।"**[7]

परन्तु अभिनवगुप्तपादेन नाट्यशास्त्रस्य व्याख्यायां रसः नवसंख्यकत्वमेव इति विलिखति । तद्यथा -

**"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः ।**
**बीभत्साद्भुतशान्ताश्च नव नाट्यरसाः स्मृताः ।।"**[8]

आचार्यो मम्मटो निर्वेदमपि स्थायिभावं परिकल्प्य शान्तं नवमं रसमिति वदति। तदुक्तं काव्यप्रकाशे -

**"निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः।"**[9]

**अभिनवगुप्तानुसारं शान्तरसः -**

अभिनवगुप्तः दशमशताब्द्यां काश्मीरदेशे जातः। सः बहुशास्त्रपारगः आसीत्। तेनअभिनवभारतीनाम्नी व्याख्यायां भरतमुनेः नाट्यशास्त्रस्य गूढार्थाः प्रकाशिताः। तत्र एव सः शान्तरसस्य सप्रमाणं निरूपणं करोति। अभिनवगुप्तस्य विचारधारा काश्मीरशैवदर्शनस्य प्रभावेन पूर्णा आसीत्। तस्मात् कारणात् तस्य रसानुभवविचारे आध्यात्मिकता, चैतन्यतत्त्वं, ब्रह्मानन्दसदृशता च दृश्यते।

शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्तकः । स तु तत्त्वज्ञान-वैराग्याशयशुद्ध्यादिभिर्विभावैः समुत्पद्यते। तस्य यमनियमाध्यात्म-ध्यान-धारणोपासनसर्व भूतदयालिङ्गग्रह- णादिभिरनु भावैरभिनयः प्रयोक्तव्यः। व्यभिचारिणश्चास्य निर्वेदस्मृतिधृतिसर्वा श्रमशौचस्त-म्भरोमाञ्चादयः । तद्यथा-

**मोक्षाध्यात्मसमुत्थस्तत्त्वज्ञानार्थ हे तुसंयुक्तः ।**
**नैः श्रेयसोपदिष्टः शान्तरसो नाम सम्भवति ॥**
**बुद्धीन्द्रियकर्मेन्द्रियसंरोधाध्यात्मसंस्थितोपेतः ।**
**सर्वप्राणिसुखहितः शान्तरसो नाम विज्ञेयः ॥**
**न यत्र दुःखं न सुखं न द्वेषो नापि मत्सरः ।**
**समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः ॥**
**भावाः विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः ।**
**विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते ॥**
**स्वं स्वं निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।**
**पुनर्निमित्तापाये च शान्त एवोपलीयते ॥**
**एवं नवरसा दृष्टा नाट्यज्ञैर्लक्षणान्विताः ।**[10]

तत्र केचिदाहुः- शान्तः शमस्थायिभावात्मकस्तपस्यायोगिसम्पर्कादिभिः विभावैरुत्पद्यते। तस्य कामक्रोधाद्यभावरूपैरनुभावैरभिनयः। व्यभिचारी धृतिमतिप्रभृतिः

एतदपरे न सहन्ते। शमशान्तयो पर्यायत्वात्। एकोनपञ्चाशद्भावा इति सङ्ख्यात्यागात्। किञ्च विभावा ऋतुमाल्यादयस्तत्समनन्तरभाविनि शृङ्गारादावनुसन्धीयन्ते इति युक्तम्। तपोऽध्ययनादयस्तु न शान्तस्य समनन्तरहेतवः । तत्त्वज्ञानस्यानन्तरहेतव इति चेत्पूर्वतरोदिततत्त्वज्ञानेऽपि तर्हि प्रयोज्यतेति तपोऽध्ययनादीनां विभावता त्यक्ता स्यात् । कामाद्याभावोऽपि नानुभावाः । अशान्ताद्विपक्षाद-व्यावृत्तेः । अगमकत्वात्प्रयोगासमवायित्वाच्च। न हि चेष्टाव्युपरमः प्रयोगयोग्यः । सुप्तमोहादयोऽपि हि निःश्वासोच्छ्वासपतनभूषणादिभिश्चेष्टा-भिरेवानुभाव्यन्ते। धृतिप्रभृतिरपि प्राप्तविषयोपभोगः कथं शान्ते स्यात्। न चाकिञ्चित्करत्वमात्रेण तत्त्वज्ञानोपाये व्युत्पाद्यन्ते विनेयाः । न चैते परदुःखदुःखितमनसो दृश्यन्ते सम्यग्दर्शनसमावस्थां प्राप्ताः । अपि तु संसारे। तन्न शान्तो रस इति।

अत्रोच्यते- इह तावद्धर्मादित्रितयमिव मोक्षोऽपि पुरुषार्थः । शास्त्रेषु स्मृतीतिहासादिषु च प्राधान्येनोपायतो व्युत्पाद्यत इति सुप्रसिद्धम्। यथा च कामादिषु समुचिताश्चित्तवृत्तयो रत्यादिशब्दवाच्याः कविनटव्यापारेणास्वादयोग्यताप्रापणद्वारेण तथाविधहृदयसंवादवतः सामाजिकान् प्रति रसत्वं शृङ्गारादितया नीयन्ते तथा मोक्षाभिधानपरमपुरुषार्थोचिता चित्तवृत्तिः किमिति रसत्वं नानीयत इति वक्तव्यम् । या चासौ तथाभूता चित्तवृत्तिः सैवात्र स्थायिभावः । एतत्तु चिन्त्यम्। किं नामासौ--तत्त्वज्ञानोत्थितो निर्वेद इति केचित्। तथा हि दारिद्र्यादिप्रभवो यो निर्वेदः स ततोऽन्य एव। हेतोस्तत्त्वज्ञानस्य वैलक्षण्यात्। स्थायिसञ्चारिमध्ये चैतदर्थमेवायं पठितः । अन्यथा माङ्गलिको मुनिस्तथा न पठेत्। जुगुप्सां च व्यभिचारित्वेन शृङ्गारे निषेधन्मुनिर्भावानां सर्वेषामेव स्थायित्वसञ्चारित्वचित्तोपात्तत्वानुभावस्थत्वानि योग्यतोपनिपातितानि शब्दार्थबलाकृष्टान्यनु जानाति।

तत्त्वज्ञानजश्च निर्वेदः स्थाय्यन्तरोपमर्दकः । भाववैचित्र्यसहिष्णुभ्योरत्यादिभ्यो यः परमः स्थायिशीलः स एव हि स्थाय्यन्तराणामुपमर्दकः। इदमपि पर्यनुयुज्यते तत्त्वज्ञानजो निर्वेदोस्य च स्थायीति वदता तत्त्वज्ञानमेवात्र विभावत्वेनोक्तं स्यात्। वैराग्यबीजादिषु कथं विभावत्वम्। तदुपायत्वादिति चेत्कारणकरणोऽयं विभावताव्यहारः । स चातिप्रसङ्गावहः ।

किञ्च निर्वेदो नाम सर्वत्रानुपादेयताप्रत्ययः । वैराग्यलक्षणः । स च तत्त्वज्ञानस्य प्रयुक्तो (प्रत्युतो) पयोगि। विरक्तो हि तथा प्रयतते यथा अस्य तत्त्वज्ञानमुत्पद्यते । तत्त्वज्ञानाद्धि मोक्षः। न तु तत्त्वं ज्ञात्वा निर्विद्यते निर्वेदाच्च मोक्ष इति । **"वैराग्यात्प्रकृतिलयः ।"**[11] इति हि तत्रभवन्तः

ननु तत्त्वज्ञानिनः सर्वत्र दृढतरं वैराग्यं दृष्टम्। तत्रभवद्भिरप्युक्तं-**"तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्"**[12] इति । भवत्वेतत्। तादृशं तु **"वैराग्यं ज्ञानस्येव पराकाष्ठा।"**[13] इति भुजङ्गविभुनैव भगवताऽभ्यधायि। ततश्च तत्त्वज्ञानमेवेदं तत्त्वज्ञानमालया परिपोष्यमाणमिति न निर्वेदः स्थायी। किंतु तत्त्वज्ञानमेवेदं स्थायीति भवेत्। यत्तु व्यभिचारिव्याख्यानावसरे वक्ष्यते तच्चिरकालविभ्रमविप्रलब्धस्योपादेयत्वनिवृत्तये यत्सम्यग्ज्ञानम् ।

यथा--

**"वृथा दुग्धोऽनड्वांस्स्तनभरनता गौरिति परं**
**परिष्वक्तः षण्डो युवतिरिति लावण्यरहितः ।**
**कृता वैदूर्याशा विकचकिरणे काचशकले**
**मया मूढेन त्वा कृपणमगुणज्ञं प्रणमता ॥"**

तन्निर्वेदस्य खेदरूपस्य भावत्वेन । एतच्च तत्रेव वक्ष्यामः ।

ननु मिथ्याज्ञानमूलो विषयगन्धस्तत्त्वज्ञानात्प्रशाम्यतीति दुःखजन्म सूत्रेणाक्षपाद पादैर्वदद्भिर्मिथ्याज्ञानापचयकारणं तत्त्वज्ञानं वैराग्यस्य दोषापायलक्षणस्य कारणमुक्तम्। ननु ततः किम् । वैराग्यं निर्वेदः। क एवमाह। निर्वेदो हि शोकप्रवाहप्रसररूपश्चित्तवृत्तिविशेषः । वैराग्यं तु रागादीनां प्रध्वंसः ।

भवतु वा वैराग्यमेव निर्वेदः । तथापि तस्य स्वकारणवशान्मध्यभाविनोऽपि न मोक्षे साध्ये सूत्रस्थानीयता प्रत्यपादि आचार्येण। किञ्च तत्त्वज्ञानोत्थितो निर्वेद इति शमस्यैवेदं निर्वेदनाम कृतं स्यात्। न च शमशान्तयोः पर्यायत्वमाशङ्कनीयम् । हासहास्ययोरिव सिद्धसाध्यतया लौकिकालौकिकतया साधारणासाधारणतया च वैलक्षण्यात् शमशान्तयोरपि सुलभमेव। तस्मान्न निर्वेदः स्थायीति। अन्ये मन्यन्ते रत्यादय एवाष्टौ चित्तवृत्तिविशेषा उक्ताः । त एव कथितविभावविविक्तया श्रुत्याद्यलौकिकविभावविशेषसंश्रया विचित्रा एव तावत्। ततश्च तन्मध्यादेवान्य-तमोऽत्र स्थायी। तत्रानाहतानन्दमयस्वात्मविषया रतिरेव मोक्षसाधनमिति सैव शास्त्रे स्थायिनीति । यथोक्तम् -

**"यश्चात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।**
**आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते "**इति ॥[14]

एवं समस्तविषयवैकृतं पश्यतो विश्वं च शोच्यं विलोकयतः सांसारिकं च वृत्तान्तम- पकारित्वेन पश्यतः सातिशयमसम्मोहप्रधानं विनयमाश्रितवतः सर्वस्माद्विषयसार्थाद्विभ्यतः सर्वलोकस्पृहणीया-दपि प्रमदादेर्जुगुप्समानस्यापूर्व-स्वात्मातिशयलाभाद्विस्मयमानस्य मोक्षसिद्धिः इति।

रतिहासादीनां विस्मयान्तानामन्यतमस्य स्थायित्वं निरूपणीयम्। न चैतन्मुनेः सम्मतम् । यावदेव हि विशिष्टान्विभावान्परिगणयति आदिशब्देन च तत्प्रकाराने वान्यान्संगृह्णीते तावदेव तद्व्यति-रिक्तालौकिक हे तूपनतानां रत्यादीनामनुजानात्येवापवर्गविषयत्वम्। एवंवादिना तु परस्परमेव विचारयतामेकस्य स्थायित्वं विशीर्यत एव। तदुपायभेदात्तस्य तस्य स्थायित्वमित्यप्युच्यमानं प्रत्युक्तमेव। स्थायिभेदेन प्रतिपुरुषं रसस्याप्यानन्त्यापत्तौ मोक्षैकफलत्वादेको रस इति चेत् क्षयैकफलत्वे वीररौद्रयोरप्येकत्वं स्यात् । अन्ये तु पानकरसवदविभागं प्राप्ताः सर्व एव रत्यादयोऽत्र स्थायिन इत्याहुः। चित्तवृत्तीनामयुगपद्भावादन्योन्यं च विरोधादेतदपि न मनोज्ञम् ।

कस्तर्हात्र स्थायी। उच्यते- इह तत्त्वज्ञानमेव तावन्मोक्षसाधनमिति तस्यैव मोक्षे स्थायिता युक्ता। तत्त्वज्ञानं च नामात्यज्ञानमेव। आत्मनश्चाव्यतिरिक्तं स्यादस्यैव ज्ञानम्। परो होमात्माऽनात्मैव स्यात्। विपश्चितं चैतदस्मद्येरुभिः । अस्माभिश्चान्यत्र वितन्यत इतीह नातिनिर्बन्धः कृतः ।

तेनात्मैव ज्ञानानन्दादिविशुद्धधर्मयोगी परिकल्पितविषयोपराग-रहितोऽत्र स्थायी। न चास्य (स्या) स्थायितया स्थायित्वं वचनीयम्। रत्यादयो हि तत्तत्कारणान्तरोदयप्रलयोत्पद्य -मानविरुध्यमानवृत्तयः कश्चित्कालमापेक्षिकतया स्थायिरूपात्मभित्तिसंश्रयाः सन्तः स्थायिन इत्युच्यन्ते। तत्त्वज्ञानं तु सकलभावान्तरभित्तिस्थानीयं सर्वस्थायिभ्यः स्थायितमं सर्वाः रत्यादिकास्स्थायिचित्तवृत्तीर्व्यभिचारीभावयत् निसर्गत एव सिद्धस्थायिभावमिति तन्त्रवचनेन (तन्नवचनीयम्) । अत एव पृथगस्य गणना न युक्ता। न हि खण्डमुण्डयोर्मध्ये तृतीयं गोत्वमिति गण्यते। तैनैकान्नपञ्चाशद्भावा इत्यव्याहितमेव ।

अस्यापि कथं (न) पृथग्गणनेनेति चेत्- पृथगास्वादायोगादिति ब्रूमहे। न हि रत्यादय इवेतरासम्पृक्तेन वपुषा तथाविधमात्मरूपं लौकि-कप्रतीतिगोचरम्। स्वगतमप्यविकल्परूपं व्युत्थानावसरेऽनुसन्धी-यमानं चित्तवृत्त्यन्तरकलुषमेवावभाति ।

भासतां वा लोके तथा। तथापि न सम्भावनामात्रस्थायिनां गणनम्। रसेषूक्तेष्वनुपयोगात्। अपि तु व्यभिचारित्वाल्लक्षणीयत्वं विज्ञायते नेति (नेतरथा) तथाह्येकोनपञ्चाशता भावैरित्येतत्प्रघट्टकोपपत्तिः । न चास्यात्मस्वभावस्य व्यभिचारित्वसम्भवादवैचित्र्यावहत्वाद- नौचि-त्याच्च । स शमात्मस्वभावः । स शम-शब्देन मुनिव्यपदिष्टः । यदि तु स एव शमशब्देन व्यपदिश्यते निर्वेदशब्देन वा तन्न कश्चिद् बाधः। केवलशमश्चित्तवृत्त्यन्तरम्। निर्वेदोऽपि दारिद्र्यादिवि-भावान्तरो-त्थितनिर्वेदतुल्यजातीयो न भवति तज्जातीय एव। हेतुभेदेऽपि तद्व्यपदेश्यो रतिभयादिरिव ।

तदिदमात्मस्वरूपमेव तत्त्वज्ञानं शमः। तथा च यत्कालुष्योपरा-गविशेषा एवात्मनो रत्यादयः। तदनुगमेऽपि रूपव्यवधान-समाधिबलादधिशय्य व्युत्थानेऽपि प्रशान्तिता (न्तता) भवति। यथोक्तं- **"(तस्य) प्रशान्तवाहिता संस्कारात्"**[15] इति। तत्त्वज्ञानलक्ष-णस्य च स्थायिन समस्तोऽयं लौकिका-लौकिकचित्तवृत्तिकलापो व्यभिचारितामभ्येति। तदनुभावा एव च यमनियमाद्युपकृता अनुभावा उपाङ्गाभिनयस्य (आङ्गिका) ध्यायत्रये च ये स्वाभावाभिनया वक्ष्यन्ते।

अत एते तद्विषया एव। प्रक्षयोन्मुखाश्च रत्यादयोऽत्रास्वाद्याः केवलम् । यथा विप्रलम्भे औत्सुक्यं संभोगेऽपि वा **"प्रेमाऽसमा-प्तोत्सव"**[16] इति। यथा च रौद्रे औग्र्यं यथा च करुणवीर-भयानकाद्भुतेषु। निर्वेदधृतित्रासहर्षा व्यभिचारिणोऽपि प्राधान्ये-नावभासन्ते तथा न जुगुप्सायाम्। सर्वथैव रागप्रतिपक्षत्वात् ।

तथा हि महाव्रते नरक पालादिधारणमसु (स्व) भार्यादिसम्पदादि-विस्तार-संक्षेपादिकर्मीकृतिर्हि धर्मे जुगुप्साहेतुत्वेनैव । घृताञ्जनेन च देवरात्पुत्र-जन्माद्युपदिष्टम् ।

स्वात्मनि च कृतकृत्यस्य परार्थघटनायामेवोद्यम इत्युत्साहोऽस्य परोपकारविषयेच्छाप्रयत्नरूपो दयापरपर्यायोऽभ्यधिकोऽन्तरङ्गः। अत एव तत्केचिद्दयावीरत्वेन व्यपदिशन्ति। अन्ये धर्मवीरत्वेन । ननूत्साहोऽहङ्कारप्राणः। शान्तस्त्वहङ्कारशैथिल्यात् द्वैविध्यात्तद्वि-रुद्धात्मकः । व्यभिचारित्वं हि विरुद्धस्यापि न नोचितं रताविव निर्वेदादेः ।

**"शय्याशाद्वलमासनं शुचि शिला सद्म द्रुमाणामधः**
**शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः ।**
**इत्यप्रार्थितसर्वलभ्यविभवे दोषाऽयमेको वने**
**दुष्प्रापार्थिनि यत्परार्थघटनावन्ध्यैर्वृथा स्थीयते ॥"**[17]

इत्यादौ हि परोपकारकरणे ह्युत्साहस्यैव प्रकर्षो लक्ष्यते। नतूत्साहशून्या काचिदप्यवस्था। इच्छाप्रयत्नव्यतिरेकेण पाषाण-तापत्तेः । यत एव परिदृष्टपरापरत्वेन स्वात्मोद्देशेन कर्तव्यान्तरं नावशिष्यते अत एव शान्तहृदयानां परोपकाराय शरीरसर्वस्वा-दिदानं च शान्तविरोधि।

**"आत्मानं गोपायेत्"**।[18] इत्यादिना ह्यकृतकृत्यविषयं शरीररक्षण-मुपदिश्यते । संन्यासिनां तद्रक्षणा-दितात्पर्याभावत्। तथा हि-

**"धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः ।**
**तान्निघ्नता किन्न हतं रक्षता किं न रक्षितम् ॥"**[19]

इति । सुप्रसिद्धचतुर्वर्गसाधकत्वमेव देहरक्षायाः निदानं दर्शितम् । कृतकृत्यस्य **"जलेऽग्नौ श्वभ्रे वा पतेत्"** इति संन्यासित्वे श्रवणात्। तद्यथाकथञ्चित्त्याज्यं शरीरं यदि परार्थं न त्यज्यते तत्किमिव (न) सम्पादितं भवति। जीमूतवाहनादीनां न यतित्वमिति चेत् किं तेन नः। तत्त्वज्ञानित्वं तावदयवश्यमस्ति। अन्यथा देहात्ममानिनां देह एव सर्वस्वभूते (तः)। धर्माद्यनुद्देशेन परार्थे त्यागस्यासम्भवात् । युद्धेऽपि हि न शरीरस्य त्यागायोद्यमः। पराजयोद्देशेनैव प्रवृत्तेः। भृगुप-तनादावपि शुभतरदेहान्तरसम्पिपादयिषैवाधिकं विजृम्भते। तत्स्वा-र्थानुद्देशेन परार्थसम्पत्त्यै यद्यच्चेष्टितं देहत्यागपर्यन्तमुपदेशदानादि

तत्तदलब्धात्मतत्त्वज्ञानानामसम्भाव्यमेवेति तेऽपि तत्त्वज्ञानिनः। **"ज्ञानिनां सर्वेष्वाश्रमेषु मुक्तिः"**इति स्मार्तेषु श्रुतौ च। यथोक्तम्-

**"देवार्चनरतस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः ।**
**श्राद्धं कृत्वा ददद्रव्यं गृहस्थोऽपि हि मुच्यते ।।"**इति

केवलं परार्थाभिसन्धिजाद्धर्मात्परोपकारात्मकफलत्वेनैवाभिसंहिता-त् पुनरपि देहस्य तदुचितस्यैव प्रादुर्भावो बोधिसत्त्वादीनाम् । तत्त्वज्ञानिनामपि विश्रान्तिलाभस्वभावौचित्यात्। यथा रामस्य वीरोऽङ्गी पितुराज्ञां पालयितुः । एवं शृङ्गाराद्यङ्गेष्वपि मन्तव्यम्। अत एव शान्तस्य स्थायित्वेऽप्यप्रधान्यम्।इतिहासपुराणाभिधान-कोशादौ च नवरसाः श्रूयन्ते श्रीमत्सिद्धान्तशास्त्रेष्वपि। तथा चोक्तम्-

**"अष्टानामिह देवानां शृङ्गारादीन् प्रदर्शयेत् ।**
**मध्ये च देवदेवस्य शान्तं रूपं प्रकल्पयेत् ॥"** (इति)

तस्य च वैराग्यसंसारभीरुतादयो विभावाः। स हि तैरुपनिबद्धैर्वि-ज्ञायते । मोक्षशास्त्रचिन्तादयोनु ऽभावाः । निर्वेदमतिस्मृतिधृतयो व्यभिचारिणः। अत एवेश्वरप्रणिधानविषये भक्तिश्रद्धे स्मृतिमतिधृत्यु-त्साहाद्यनुप्रविष्टेभ्योऽन्ये एवाङ्गमिति न तयोः पृथत्वेन गणनम्। अत्र सङ्ग्रहकारिका--

**मोक्षाध्यात्मनिमित्तास्तत्त्वज्ञानार्थहे तुसंयुक्तः ।**
**निःश्रेयसा धर्मयुतः शान्तरसो नाम विज्ञेयः ॥**

विभावस्थाय्यनुभावयोगः क्रमाद्विशेषणत्रयेण दर्शितः ।

**स्व स्व निमित्तमासाद्य शान्ताद्भावः प्रवर्तते।**
**पुनर्निमित्तापाये तु शान्त एव प्रलीयते ॥**

इत्यादिना रसान्तरप्रकृतित्वमुपसंहृतम् ।एवमेव शान्तरस विषये नैकोदाहरणाः अभिनवगुप्तपादाः नाट्यशास्त्रे वर्णिताः सन्ति ।

**उपसंहारः –**

अभिनवगुप्तस्य शान्तरसविचारः भारतीयकाव्यशास्त्रस्य अमूल्यं योगदानम् अस्ति। तेन रससिद्धान्तः केवलं साहित्यिकालोचनायाः विषयः न कृतः, अपि तु मानवानुभवस्य आध्यात्मिकपरिमाणेन सम्बद्धः। शान्तरसः तस्य मते सर्वेषां रसानां परिपाकः, चित्तस्य परमविश्रान्तिः, आत्मानन्दस्य कलात्मकाभिव्यक्तिः च अस्ति। अस्य सिद्धान्तस्य प्रभावः भारतीयसाहित्ये, दर्शनशास्त्रे, कलासु च व्यापकः दृश्यते। अभिनवगुप्तस्य चिन्तनं अद्यापि सहृदयानां मनांसि प्रकाशयति, तथा च मनुष्यजीवनस्य परमलक्ष्यंशान्तिं, आनन्दं, आत्मबोधं चप्रति मार्गदर्शनं करोतीति अत्रैव मम शोधपत्रं उपसंहरामि ।

**सहायकग्रन्थाः –**


1. काव्यप्रकाशः (मम्मटः), झलकीकरटीका - परिमलपब्लिकेशन, दिल्ली, परिमलसंस्कृतग्रन्थमाला- 97
2. ध्वन्यालोकः (लोचनटीका) आनन्दवर्धनः, तारावती हिन्दी-व्याख्या डा. रामसागरत्रिपाठी, मोतिलाल् वनारसीदास, वारणासी, १९७३
3. नाट्यशास्त्रीयानुसन्धानम् –रामजी उपाध्यायः, चौखम्बा विद्याभवन वारणासी- -221001, द्वितीय संस्करणम्-1992
4. संस्कृतनिबन्धशतकम् -डा. कपिलदेवद्विवेदीआचार्य, विश्वविद्या-लयप्रकाशन, चौखम्बा, वारणासी, त्रयोदशसंस्करण- २००८।
5. रसस्वरूपविमर्शः -हरिप्रसादपाण्डेयः, न्यू भारतीयबुक् कर्पोरेसन्, दिल्ली, २०१२
6. संस्कृतवाङ्गय का बृहद् इतिहास - बलदेव उपाध्याय, उत्तरप्रदेश संस्कृत संस्थान, 1977
7. साहित्यदर्पणः , शशीकलाटीका , चौखम्बा विद्याभवन वारणासी- -221001
8. नाट्यशास्त्रम् , अभिनवभारतिटीका , प्रथमभागः , सम्पादकः –मधुसूदनशास्त्री , चैखम्बा विश्वविभारती , वारणासी
9. भारतीय काव्यशास्त्र की परम्परा , सम्पादक डा. नागेन्द्र ,नेशनाल पब्लिशिंग हाउस् , नई सडक , दिल्ली ।


**पाद टिप्पणी –**

1. ऋ.वे- 9.63.13
2. तै.उ-11.7.1
3. तैत्तिरीय उप .2.6, पृ.315
4. ना.शा – 6.32
5. का.प्र4/26/27
6. ना.शा – 6/38
7. ना.शा.-6.
8. वि.ध.पु.17.61
9. का. प्र. 4.40
10. ना.शा अभिनवभारती टीका.-6- पृ-608
11. सांख्यकारिका 45.
12. योगसूत्र-1-16
13. व्यासभाष्य-1-16
14. गीता 3-17
15. योगसू. 3-10
16. तापसवत्सराज. 1-17
17. नागानन्द. 4-2
18. गौतमधर्मसूत्र. 9.35
19. हितोपदेश-1.83